# PYRAMID
IIT-JEE | MEDICAL | FOUNDATION

## 'एकलव्य' TEST SERIES PAPER

### STD : X [HL]
### SUBJECT : SANSKRIT FULL


**TIME : 3 HR.** **MAX. MARKS : 80**


**सूचनाः** १) सर्वासु कृतिषु वाक्यानां पुनर्लेखनम् आवश्यकम् ।
२) यथासूचनं आकलनकृतयः व्याकरणकृतयः आरेखितव्याः ।
३) आकृतीनाम् आलेखनं मसीलेखन्या कर्तव्यम् ।

---

## प्रथमः विभागः - सुगमसंस्कृतम् । (८)

**प्र.१ अ) चित्रं दृष्टवा नामानि लिखत - (५ तः ४)** **(४)**

१) 
२) 
३) 
४) 

५) 


**आ) सङ्ख्या अक्षरैः / अङ्कैः लिखत । (३ तः २)** **(२)**

१) ९६ - __________

२) अष्टचत्वारिंशत् - __________

३) ०३ - __________

**इ) समयं स्तम्भमेलनं कुरुत ।** **(२)**

| | अ | आ |
|---|---|---|
| १) | पञ्चत्रिंशदधिक - षड्वादनम् | २.१५ |
| २) | सपाद - द्विवादनम् | ८.०० |
| ३) | पादोन - द्वादशवादनम् | ६.३५ |
| ४) | अष्टवादनम् | ११.४५ |

## द्वितीयः विभागः - गद्यम् । (२०)

**प्र.२ अ) ग**

आसीत् सुदासो नाम कश्चिदुद्यानपालः । तस्य तडागे कदाचित् सत्यपि शिशिर- ऋतावेकं पद्मं व्यकसत् , व्योम्नीव बालसूर्यबिम्बम् । सोऽचिन्तयत् , 'अहो **महिमा परमात्मनः** , यदेतादृशे कालेऽतिशीते विभूषितो मे तडाग एतस्य सरसिजस्य विकासेन । एतत् सरसिजं विक्रीयाहं विपुलं धनं प्राप्नुयाम्' इति । एवं सञ्चिन्त्य स तद् विक्रेतुं **राजसद्मनः** पुरतः स्थितः । अत्रान्तरे तेनैव **अध्वना** कश्चित् **श्रीमान्** सार्थवाहः समायातः । सोऽवदत् , 'भद्र, **भगवान्** सुगतः सम्प्रत्येतस्मिन्नगरे वसति । **महात्मनः** तस्य पूजार्थमिदं कमलमभ्यर्थये । तत्क्रियता मूल्येन ददासि?' उद्यानपालोऽब्रवीत् , 'एकेन सुवर्णनाणकेन' । अथ स सार्थवाहः यावत्तत् कमलं क्रेतुमिच्छति, तावदेवापरो **धनवान् श्रेष्ठी** अपि सुगतदर्शनार्थं गच्छन् तत्र समुपस्थितः । नीरजमूल्यं पृच्छन्तं तं **श्रेष्ठिनम्** उद्यानपालोऽब्रूत 'एष महाभाग एकं सुवर्णनाणकम् एतस्यार्थे दातुमिच्छति' । **श्रेष्ठी** अगदत् , 'अहं दश सुवर्णनाणकानि यच्छामि।' सार्थवाहोऽभणत् , 'अहं शतं सुवर्णनाणकानि प्रयच्छामि ' । तयोर्विवादं श्रुत्वा सुदासो व्यमृशत् 'यस्य कृते एतौ कमलमेतत् क्रेतुमिच्छतः, नूनं स सुगत एवाधिकतमं मूल्यं मह्यं दद्यात् ' इति । अतः स उद्यानपालस्तावभाषत 'नैतद् भो विक्रेतुमिच्छामि' इति ।

अथ प्राप्तः सुदासस्तदुद्यानं, यत्र **भगवतः** सुगतस्य निवासः । तत्र वटवृक्षस्याधस्तादेकस्मिन्नश्मखण्डे समुपविष्ट आसीत्स **महात्मा** । अनल्पेन **धाम्ना** राजते स्म तस्य **भगवतो** वदनम् । तदालोकयतः सुदासस्य चित्ते भक्तिरसार्णव उदतिष्ठत् । स हस्तस्थं नीरजं **भगवतः** सुगतस्य चरणयोरर्घ्यं कृत्वा 'नमो भगवते' इति वदन् सविनयं प्राणमत् ।

---

*'You should never let your fears prevent you from doing what you know is right.'*
*Aung San Suu Kyi - Burmese politician, diplomat and author (b.1945)*

**अ) १) अवबोधनम् । (४ तः ३)** **(३)**

**क) उचितं कारणं चित्वा वाक्यं पुनर्लिखत ।**

सार्थवाहः सुदासाय शतसुवर्णनाणकानि दातुम् उद्युक्तः यतः ------------।

१) सः सुदासस्य सहाय्यं कर्तुम् इच्छति स्म ।

२) सः सुदासात् कमलं क्रेतुम् इच्छति स्म ।

**ख) वाक्यं पुनर्लिखित्वा सत्यम् / असत्यम् इति लिखत ।**

सुदासः मालाकार आसीत् ।

**ग) कः कं वदति ?**

नमो भगवते ।

**घ) पूर्णवाक्येन उत्तरं लिखित ।**

पद्मं कीदृशम् ?

**अ) २) शब्दज्ञानम् । (३ तः २)** **(२)**

**क) गद्यांशतः त्वा - ल्यप् - अव्यये चित्वा लिखत ।**

[ ] [ ]

**ख) सुदासस्य चित्ते भक्तिरसार्णव उदतिष्ठत् । (लकारं लिखत)**

**ग) विशेषण - विशेष्य - सम्बन्धः ।**

**चतुर्थपदं लिखत ।**

१) अधिकतमं : मूल्यम् :: ------------ नीरजम् ।

२) धनवान् : श्रेष्ठी :: ------------- सार्थवाहः ।

**अ) ३) पृथक्करणम् ।** **(२)**

**क्रमेण योजयत ।**

१. श्रेष्ठिनः सार्थवाहस्य च विवादः ।

२. शिशिर - ऋतौ पद्मस्य विकासः ।

३. सुदासः विक्रयणार्थं राजसद्मनः पुरतः स्थितः ।

४. सुदासस्य धनप्राप्तेः इच्छा ।

**आ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

महोदयः - भवत्याः समीपे एतं सुभाषितसङ्ग्रहं दृष्ट्वा मया एवं चिन्तितम् ।

महोदया - ओह् ! यद्यपि संस्कृतं न पाठयामि तथापि अस्य पुस्तकस्य मम कार्यक्षेत्रेण सह सम्बन्धः अस्ति ।

महोदयः - एवम् । कस्मिन् क्षेत्रे कार्यरता भवती ?

महोदया - अहं व्यवस्थापनप्रशिक्षिकारूपेण कार्यं करोमि । मया अवगतं यद् रामायण - महाभारत - किरातार्जुनीय - रघुवंश - इत्यादिषु बहवः श्लोकाः सन्ति येषु व्यवस्थापनशास्त्रस्य मूलतत्वानि दृष्टान्तसहितानि निर्दिष्टानि । अनेन काव्यमाध्यमेन विषयप्रवेशः सुगमः भवति । एषा पद्धतिः मया स्वीकृता जनैरपि अभिमता । अतः मया पुनरेकवारं संस्कृतभाषायाः संस्कृतकाव्यादीनां च अध्ययनं प्रारब्धम् ।

महोदयः - अहो आश्चर्यम् । शालायाः अनन्तरं खण्डितं मम संस्कृताध्ययनम् । तदपि अधुनैव पुनः आरब्धम् ।

महोदया - कथं कथम् ?

महोदयः - वस्तुतः अहं वाणिज्यशाखायाः स्नातकः । विधिशाखायाः पदवी अपि प्राप्ता मया । साम्प्रतं बहुराष्ट्रियसंस्थायां विधिविमर्शकरूपेण कार्यं करोमि । तदनुसृत्य कौटिलीयम् अर्थशास्त्रं, याज्ञवल्क्यस्मृतिः आदीनां ग्रन्थानाम् अध्ययनं साहाय्यकरं भवेत् इति गुरुभिः उक्तम् । अतः अधुना अहं शास्त्रविषयकाणां संस्कृतग्रन्थानाम् अध्ययने यत्नं करोमि । (स्यूतात् किमपि संस्कृतपुस्तकं दर्शयति।)

(तयोः पृष्ठतः केचन युवकाः गोष्ठिषु रताः । प्रसादः, समीरः, लीना तथा तनुजा इत्येतानि परस्परमित्राणि । तेषु अन्यतमः तत् पुस्तकं दृष्ट्वा महोदयम् उपगम्य वदति ।)

समीरः - महोदय, भवतोः संवादे संस्कृतस्य सन्दर्भः श्रुतः मया । भवानपि विश्वसंस्कृतपरिषन्निमित्तं विदेशं प्रस्थितः ?

महोदयः - न खलु । परं कीदृशी एषा विश्वसंस्कृतपरिषद् ? अपि भवान् संस्कृतस्य छात्रः ?

समीरः - आम् । अहम् आय. आय. टी. अर्थात् भारतीय - प्रौद्योगिकी - संस्थानम् इत्यत्र सङ्गणक - अभियान्त्रिकी इति विषयस्य छात्रः । तत्र छात्राः संस्कृतमपि पठितुं शक्नुवन्ति । अष्टाध्यायी इति व्याकरणशास्त्रविषयकः ग्रन्थः पाठ्यते तत्र मानव्यविद्याविभागे । अहं संस्कृतव्याकरणं सङ्गणकशास्त्रं च इति विषयम् अधिकृत्य संशोधनं करोमि । तद्विषयकं शोधनिबन्धं प्रस्तोतुम् अहं परिषदि निमन्त्रितः ।

**आ) १) अवबोधनम् । (४ तः ३)** **(३)**

**क) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत ।**

१) पृष्ठतः ------------ युवकाः गोष्ठिषु रताः । (कश्चन / केचन)

२) एषा ----------- मया स्वीकृता । (पद्धतिः / पद्धतिं)

**ख) वाक्यं पुनर्लिखित्वा सत्यम् / असत्यम् इति लिखत ।**

अष्टाध्यायी इति व्याकरणशास्त्रविषयकः ग्रन्थः अस्ति ।

**ग) पूर्णवाक्येन उत्तरं लिखत ।**

महोदयः किं कार्यं करोति ?

**घ) एषः गद्यांशः कस्मात् पाठात् उध्दृतः ?**

**२) शब्दज्ञानम् । (३ तः २)** **(२)**

**क)** प्रश्ननिर्माणं कुरुत ।

समीरः <u>परिषदि</u> निमन्त्रितः ।

**ख) सन्धिविग्रहं कुरुत ।**


इत्येतानि → -------------- + -------------- ।

**ग) विशेषण - विशेष्याणां मेलनं कुरुत ।**

| अ | ब |
|---|---|
| सुगमः | मूलतत्त्वानि । |
| दृष्टान्तसहितानि | विषयप्रवेशः । |
| | परस्परमित्राणि । |

**३) पृथक्करणम् ।** **(२)**

**जालरेखाचित्रं पूरयत ।**



**इ) माध्यमभाषया सरलार्थं लिखत । (२ तः १)** **(४)**

१) **वसन्तसेना -** (बाहू प्रसार्य) एहि मे पुत्रक! अनुकृतमनेन पितुः रूपम् । अथ किं निमित्तमेष रोदिति ?
**रदनिका -** एतेन प्रतिवेशिक - दारकस्य सुवर्णशकटिकया क्रीडितम् , तेन च सा नीता, ततः पुनस्तां याचते ततो मया इयं मृत्तिकाशकटिका कृत्वा दत्ता । ततो भणति .... 'रदनिके! किं मम एतया मृत्तिका - शकटिकया, तामेव सौवर्णशकटिकां देहि' इति ।

२) दृष्यन्तः - तपोवननिवासिनामुपरोधो मा भूत् । अत्रैव रथं स्थापय यावदवतरामि ।
सूतः - धृताः प्रग्रहाः । अवतरतु आयुष्मान् ।
दृष्यन्तः - (अवतीर्य) सूत , विनीतवेषेण प्रवेष्टव्यानि तपोवनानि नाम । इदं तावत् गृह्यताम् । (इति सूतस्याभरणानि धनुश्चोपनीय) सूत, यावदाश्रमवासिनः दृष्ट्वाऽहमपावर्ते तावदार्द्रपृष्ठाः क्रियन्तां वाजिनः ।
सूतः - तथा । (इति निष्क्रान्तः ।)

**ई) माध्यमभाषया उत्तरं लिखत । (२ तः १)** **(२)**

१) भूमाता पृथवैन्यं किम् उपादिशत् ?

२) महर्षिः कणादः परमाणुविषये किं प्रतिपादितवान् ?

## तृतीय विभागः - पद्यम् । (१८)


**प्र. ३ अ) पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

भिक्षुः क्वास्ति बलेमर्खे
पशुपतिः किं नास्त्यसौ गोकुले
मुग्धे पन्नगभूषणः
सखि सदा शेते च तस्योपरि ।
आर्यें मुञ्च विषादमाशु
कमले नाहं प्रकृत्या चला
चेत्यं वै गिरिजासमुद्रसुतयोः
सम्भाषणं पातु वः ।।
वाचनं ज्ञानदं बाल्ये
तारुण्ये शीलरक्षकम् ।
वार्धक्ये दुःखहरणं
हितं सद्ग्रन्थवाचनम् ।।

**१) पद्यांश पठित्वा निर्दिष्टे कृती कुरुत । (३ तः २)** **(२)**

**क) पूर्णवाक्येन उत्तरं लिखत ।**
विष्णुः भिक्षुरुपेण कुत्र गच्छति?

**ख) पद्यांशतः विशेषणे चित्वा लिखत ।**




**ग) सन्धिविग्रहं कुरुत ।**
नास्त्यसौ → न + ------------ + ------------ ।

२) पद्यांशं पठित्वा जालरेखाचित्रं पूरयत । (२)

**भिक्षुः क्वास्ति ------- इत्यस्मिन् श्लोके आगतानि क्रियापदानि लिखत ।**




**आ) माध्यमभाषया उत्तरं लिखत । (२ तः १)** (२)

१) 'न्याय्यात्पथः प्रविचलन्ति पदं न धीराः ।' इति सूक्तिं स्पष्टीकुरुत ।

२) कदा मदः व्यपगच्छति ?

**इ) पद्ये शुध्दे पूर्णे च लिखत । (क, ख तः १ ; ग, घ, तः १)** (६)

**१)**

क) प्रथमवयसि ----------- विस्मरन्ति ।।

**अथवा**

ख) अयं ----------- निर्धनो वा ।।

**२)**

ग) वैद्यराज ----------- धनानि च ।।

**अथवा**

घ) यादृशं ---------- फलम् ।।

**ई) अन्वयं पूरयत ।** (२)

रथस्य एकं चक्रं, सप्त ------------ तुरगाः, निरालम्बः मार्गः, --------- अपि चरणविकलः, (तथापि) रविः प्रतिदिनम् अपारस्य ------------- याति एव । महतां ----------- सत्त्वे भवति, उपकरणे न (भवति) ।

**उ) माध्यमभाषया सरलार्थं लिखत । (३ तः २)** (४)

१) शीलं सद्गुणसम्पत्तिः ज्ञानं विज्ञानमेव च ।
उत्साहो वर्धते येन वाचनं तद् हितावहम् ।।
षड्जमूला यथा सर्वे सङ्गीते विविधाः स्वराः ।
तथा मानवताधर्मं सर्वे धर्माः समाश्रिताः ।।
सर्वं व्याप्नोति सलिलं शर्करा लवणं यथा ।
एवं मानवताधर्मो धर्मान् व्याप्नोति सर्वथा ।।

## चतुर्थः विभागः - लेखनकौशलम् । (९)

**प्र.४ अ) धातूनाम् अव्ययानां च विशिष्टविभक्तेः उपयोगं कृत्वा वाक्यनिर्माणं कुरुत । (६ तः ४)** (४)

| | | | | | |
|---|---|---|---|---|---|
| १) | रक्ष् | २) | रुच् | ३) | याच् |
| ४) | कृते | ५) | वि + तृ | ६) | सह |

**अथवा**

**संस्कृतानुवादं कुरुत । (६ तः ४)**

१) कारल्याची भाजी कडु आहे.
The bitter – gourd curry is bitter.

२) मी रोज जेवणात पापड खातो / खाते.
I eat papad in my meals everyday.

३) आई दुकानातून साडी आणते.
Mother brings saree from the shop.

४) मी उद्या वहीत लिहेन.
I will write in the notebook tomorrow.

५) तो चेंडुने खेळतो.
He plays with the ball.

६) राधा जेवण वाढते.
Radha serves the food.

**आ) ५/७ वाक्यात्मकं निबन्धं लिखत । (३ तः १)** **(५)**


१) मम प्रियः नेता ।

२) मम प्रियः उत्सवः ।

३) मम प्रिया भाषा ।

**अथवा**

**साहाय्यक - शब्दानाम् आधारेण ५/७ वाक्यात्मकं चित्रणवर्णनं कुरुत ।**




(मञ्जूषा - विक्रीणीते, दर्शयति, यच्छति, पश्यति, खादति, धरति, गृह्णाति)

## पञ्चमः विभागः - भाषाभ्यासः । (१७)

**प्र.५ अ) तालिकापूर्तिं कुरुत ।**

**१. नामतालिका । (६ तः ४)** (२)

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| ----------- | मातरौ | ----------- | द्वितीया |
| कर्म | ----------- | ----------- | प्रथमा |
| ----------- | ----------- | दिग्भ्यः | चतुर्थी |

**२. सर्वनामतालिका । (६ तः ४)** (२)

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| तस्मिन् | ----------- | ----------- | सप्तमी |
| ----------- | ----------- | भवद्भिः | तृतीया |
| ----------- | आवाभ्याम् | ----------- | पञ्चमी |

**३. क्रियापदतालिका । (६ तः ४)** (२)

| लकाराः | एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|---|
| विधिलिङ् | कुर्यात् | ----------- | ----------- | प्रथमः |
| लट् | ----------- | ----------- | यतध्वे | मध्यमः |
| लङ् | ----------- | अलिखाव | ----------- | उत्तमः |

**४. धातुसाधित - विशेषण - तालिका । (६ तः ४)** (२)

| धातुः | क्त | क्तवतु | कृत्याः | शतृ/शानच् |
|---|---|---|---|---|
| प्र + विश् (६पप) | प्रविष्टः | ----------- | ----------- | प्रविशन् |
| रभ् (१आ.प) | ----------- | रब्धवान् | रभणीयः | ---------- |
| वद् (१पप) | ----------- | ------------ | वदनीयः | वदन् |

**आ) निर्दिष्टाः कृतीः कुरुत । (४ तः ३)** (९)

**१. योग्यं रूपं लिखित्वा रिक्तस्थानपूर्तिं कुरुत । (५ तः ३)**

क) छात्राः प्रत्येकं सुभाषितं ------------ (३) लिखन्ति । (आवृत्तिवाचकम्)

ख) अग्रिमे वर्षे अहम् ------------ (११) कक्षायां पठिष्यामि । (क्रमवाचकम्)

ग) ------------- (४) वेदाः वर्तन्ते । (सङ्ख्यावाचकम्)

घ) ------------- (५) पात्रे रसगोलकाः सन्ति । (क्रमवाचकम्)

च) अस्माकं कुटुम्बं संवत्सरस्य --------------(१) पर्यटनार्थं गच्छति । (आवृत्तिवाचकम्)

**२. समासानां तालिकापूर्तिं कुरुत । (५ तः ३)**

| | समस्तपदम् | विग्रहः | समासनाम |
|---|---|---|---|
| क) | ------------ | इष्टम् अनुसृत्य | अव्ययीभावः । |
| ख) | अम्भोदाः | ----------- | उपपद - तत्पुरुषः । |
| ग) | कविपण्डिताः | कवयः च पण्डिताः च । | ----------- । |
| घ) | ----------- | नीतौ निपुणाः । | सप्तमी तत्पुरुषः । |
| च) | महोदयः | ------------ | बहुव्रीहिः । |

**३.** **समानार्थकशब्दान् / विरुध्दार्थकशब्दान् लिखत । (५ तः ३)**

क) बलवान् x --------------

ख) कृष्णः = --------------

ग) धनुः = --------------

घ) बद्धः x --------------

च) शुकः = --------------

**४.** **सूचनानुसारं कृतीः कुरुत । (५ तः ३)**

क) अहं विस्तरेणं पठितुम् इच्छामि । (वाक्यं लङ्लकारे परिवर्तयत)

ख) पृथुराजः स्वराज्ये भ्रमति स्म । (स्म निष्कासयत)

ग) त्वं सत्वरं पलायिष्यसे । ('त्वं' स्थाने 'भवान्' योजयत)

घ) भानुः भुवनमण्डलं प्रकाशयति । (णिजन्तं निष्कासयत)

च) शङ्कराचार्यः सर्वाणि दर्शनानि पठितवान् । (वाच्यपरिवर्तनं कुरुत )

## षष्ठः विभागः - अपठितम् । (८)

**प्र.६** **अ) गद्यांशं पठित्वा कृतीः कुरुत । (६ तः ४)** **(४)**

एकस्मिन् वने एकः विशालः वृक्षः आसीत् । तस्मिन् बहवः खगाः वसन्ति स्म । एकदा ते अतीव बुभुक्षिताः आसन् । अतः भोजनं खादितुम् इतस्ततः भ्रमन्ति स्म । ते दूरं दूरं गच्छन्ति स्म । अन्ते च एकस्मिन् स्थाने ते तण्डुलकणान् अपश्यन् । ते तत्र गत्वा प्रसन्नतया तण्डुलान् खादन्ति स्म परन्तु जालेन बद्धाः अभवन् । अधुना किं करणीयम् इति चिन्तयित्वा ते सर्वे जालेन सह एव एकं स्वमित्रम् उपागच्छन् । तेषां मित्रम् एकः मूषकः आसीत् । सः जालं दन्तैः अकर्तयत् । अन्ते सर्वे स्वतन्त्राः भूत्वा अनृत्यन् अगायन् च । सुखं तु एकतायाम् एव विद्यते ।

**प्रश्नाः -**

१) **पूर्णवाक्येन उत्तरत ।**
बुभुक्षिताः खगाः किं अपश्यन् ?

२) **प्रातिपदिकं लिखत ।**
(क) जालेन - -------------- (ख) तेषाम् - ----------------

३) **वाक्यं पुनर्लिखित्वा सत्यम् / असत्यमिति लिखत ।**
एकः मूषकः खगानां मित्रम् आसीत् ।

४) **माध्यमभाषया सरलार्थं लिखत ।**
सुखं तु एकतायाम् एव विद्यते ।

५) **गद्यांशतः एकम् अव्ययं चित्वा लिखत ।**

६) **कारकपरिचयं कुरुत ।**
सः <u>दन्तैः</u> जालम् अकर्तयत् ।

**आ १.** **पद्यांशं पठित्वा निर्दिष्टे कृती कुरुत ।** **(२)**

अवृत्तिकं त्यजेत् देशं वृत्तिं सोपद्रवां त्यजेत् ।
त्यजेत् मायाविनं मित्रं अन्नं प्राणहरं त्यजेत् ।।

क) **पूर्णवाक्येन उत्तरत । (२ तः १)**

i) कीदृशं मित्रं त्यजेत् ?


ii) कीदृशीं वृत्तिं त्यजेत् ?

**ख)** **समानार्थक शब्दं लिखत ।**

मित्रम् = ----------------

**आ २. पद्यांशं पठित्वा जालरेखाचित्रं पूरयत ।** **(२)**

अर्थनाशं मनस्तापं गृहे दुश्चरितानि च ।
वञ्चनं च अपमानं च मतिमान् न प्रकाशयेत् ।।




* * * * *